महर्षि-गौतमकृत

# न्यायसूत्रम्

Edited by
asit panja

aarsha, jaipur :
aarshaayurveda@gmail.com

ISBN

aarsha, jaipur

## महर्षि-गौतमकृत

# न्यायसूत्रम्

(nyāyasūtram)

Edited by

asit k panja

aarsha

Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in

www.ayurvedah.in

**Publisher** : **aarsha**

**Edition** : **First; marcha 2015**

**ISBN** :

**Price** : **FREE**

Composing and editing: **Bapan Neogi**

Cover page: **Rajarshi**

For any information, feedback and requirement of this book, please mail to :

aarshaayurveda@gmail.com www.ayurvedah.in

Published by **Bapan Neogi** on behalf of **aarsha** ,

**aarsha**
Plot no. 4, Khandelwal nagar Extn,
Near Premnagar pulia, Agra Road,
Jaipur- 302031, Rajasthan

www.ayurvedah.in

# न्यायसूत्रम्

## प्रथमोऽध्यायः

## प्रथम आह्निकः

प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः ॥ (1.0)

दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः ॥ (2.0)

प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि ॥ (3.0)

इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम् ॥ (4.0)

अथ तत्पूर्वकं त्रिविधमनुमानं पूर्ववत्शेषवत्सामान्यतोदृष्टं च ॥ (5.0)

प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानम् ॥ (6.0)

आप्तोपदेशः शब्दः ॥ (7.0)

सो द्विविधो दृष्टादृष्टार्थत्वात्॥ (8.0)

www.ayurvedah.in

आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाः तु प्रमेयम् ॥ (9.0)

इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गमिति ॥ (10.0)

चेष्टेन्द्रियार्थाश्रयः शरीरम् ॥ (11.0)

घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः ॥ (12.0)

पृथिवी आपः तेजो वायुराकाशमिति भूतानि ॥ (13.0)

गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणाः तदर्थाः ॥ (14.0)

बुद्धिरुपलब्धिर्ज्ञानमित्यनर्थान्तरम् ॥ (15.0)

युगपत्ज्ञानानुत्पत्तिर्मनसो लिङ्गम् ॥ (16.0)

प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः ॥ (17.0)

प्रवर्तनालक्षणाः दोषाः ॥ (18.0)

पुनरुत्पत्तिः प्रेत्यभावः ॥ (19.0)

प्रवृत्तिदोषजनितोऽर्थः फलम् ॥ (20.0)

बाधनालक्षणं दुःखम् ॥ (21.0)

तदत्यन्तविमोक्षोऽपवर्गः ॥ (22.0)

समानानेकधर्मोपपत्तेः विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः ॥ (23.0)

www.ayurvedah.in

यमर्थमधिकृत्य प्रवर्तते तत्प्रयोजनम् ॥ (24.0)

लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं सो दृष्टान्तः ॥ (25.0)

तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तः ॥ (26.0)

सश्चतुर्विधः सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थित्यर्थान्तरभावात्॥ (27.0)

सर्वतन्त्राविरुद्धः तन्त्रेऽधिकृतोऽर्थः सर्वतन्त्रसिद्धान्तः ॥ (28.0)

समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्तः ॥ (29.0)

यत्सिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः ॥ (30.0)

अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः ॥ (31.0)

प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः ॥ (32.0)

साध्यनिर्देशः प्रतिज्ञा ॥ (33.0)

उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः ॥ (34.0)

तथा वैधर्म्यात्॥ (35.0)

साध्यसाधर्म्यात्तद्धर्मभावी दृष्टान्त उदाहरणम् ॥ (36.0)

तद्विपर्ययात्वा विपरीतम् ॥ (37.0)

उदाहरणापेक्षः तथा इति उपसंहारो न तथा इति वा साध्यस्योपनयः ॥ (38.0)

हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनम् ॥ (39.0)

अविज्ञाततत्त्वे अर्थे कारणोपपत्तितः तत्त्वज्ञानार्थम् ऊहः तर्कः ॥ (40.0)

विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः ॥ (41.0)

## प्रथमोऽध्यायः

## द्वितीय आह्निकः

प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः ॥ (1.0)

यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ (2.0)

सः प्रतिपक्षस्थापनाहीनो वितण्डा ॥ (3.0)

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीताः हेत्वाभासाः ॥ (4.0)

अनैकान्तिकः सव्यभिचारः ॥ (5.0)

सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्धः ॥ (6.0)

यस्मात्प्रकरणचिन्ता सो निर्णयार्थमपदिष्टः प्रकरणसमः ॥ (7.0)

साध्याविशिष्टः साध्यत्वात्साध्यसमः ॥ (8.0)

कालात्ययापदिष्टः कालातीतः ॥ (9.0)

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥ (10.0)

तत्त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं च इति ॥ (11.0)

अविशेषाभिहिते अर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥ (12.0)

सम्भवतोऽर्थस्यातिसामान्ययोगादसंभूतार्थकल्पना सामान्यच्छलम् ॥ (13.0)

धर्मविकल्पनिर्देशे अर्थसद्भावप्रतिषेधः उपचारच्छलम् ॥ (14.0)

वाक्छलम् एव उपचारच्छलम् तदविशेषात्॥ (15.0)

न तदर्थान्तरभावात्॥ (16.0)

अविशेषे वा किंचित्साधर्म्यात्एकच्छलप्रसङ्गः ॥ (17.0)

साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः ॥ (18.0)

विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् ॥ (19.0)

तद्विकल्पात्जातिनिग्रहस्थानबहुत्वम् ॥ (20.0)

# द्वितीयोऽध्यायः

## प्रथम आह्निकः

समानानेकधर्माध्यवसायादन्यतरधर्माध्यवसायात्वा न संशयः ॥ (1.0)

विप्रतिपत्त्यव्यवस्थाध्यवसायाच्च ॥ (2.0)

विप्रतिपत्तौ च संप्रतिपत्तेः ॥ (3.0)

अव्यवस्थात्मनि व्यवस्थितत्वात्चाव्यवस्थायाः ॥ (4.0)

तथात्यन्तसंशयः तद्धर्मसातत्योपपत्तेः ॥ (5.0)

यथोक्ताध्यवसायात्एव तद्विशेषापेक्षात्संशये नासंशयो नात्यन्तसंशयो वा ॥ (6.0)

यत्र संशयः तत्र एवमुत्तरोत्तरप्रसङ्गः ॥ (7.0)

प्रत्यक्षादीनामप्रामाण्यं त्रैकाल्यासिद्धेः ॥ (8.0)

पूर्वं हि प्रमाणसिद्धौ न इन्द्रियार्थसन्निकर्षात्प्रत्यक्षोत्पत्तिः ॥ (9.0)

पश्चात्सिद्धौ न प्रमाणेभ्यः प्रमेयसिद्धिः ॥ (10.0)

युगपत्सिद्धौ प्रत्यर्थनियतत्वात्क्रमवृत्तित्वाभावो बुद्धीनाम् ॥ (11.0)

त्रैकाल्यासिद्धेः प्रतिषेधानुपपत्तिः ॥ (12.0)

सर्वप्रमाणप्रतिषेधाच्च प्रतिषेधानुपपत्तिः ॥ (13.0)

तत्प्रामाण्ये वा न सर्वप्रमाणविप्रतिषेधः ॥ (14.0)

त्रैकाल्याप्रतिषेधश्च शब्दाद् आतोद्यसिद्धिवत्तत्सिद्धेः ॥ (15.0)

प्रमेया च तुलाप्रामाण्यवत्॥ (16.0)

www.ayurvedah.in

प्रमाणतः सिद्धेः प्रमाणानां प्रमाणान्तरसिद्धिप्रसङ्गः ॥ (17.0)

तद्विनिवृत्तेः वा प्रमाणसिद्धिवत्प्रमेयसिद्धिः ॥ (18.0)

न प्रदीपप्रकाशसिद्धिवत्तत्सिद्धेः ॥ (19.0)

क्वचिन्निवृत्तिदर्शनादनिवृत्तिदर्शनाच्च क्वचिदनेकान्तः ॥ (20.0)

प्रत्यक्षलक्षणानुपपत्तिरसमग्रवचनात्॥ (21.0)

नात्ममनसोः सन्निकर्षाभावे प्रत्यक्षोत्पत्तिः ॥ (22.0)

दिग्देशकालाकाशेषु अपि एवं प्रसङ्गः ॥ (23.0)

ज्ञानलिङ्गत्वात्आत्मनो नानवरोधः ॥ (24.0)

तदयौगपद्यलिङ्गत्वाच्च न मनसः ॥ (25.0)

प्रत्यक्षनिमित्तत्वाच्च इन्द्रियार्थयोः संनिकर्षस्य स्वशब्देन वचनम् ॥ (26.0)

सुप्तव्यासक्तमनसां च इन्द्रियार्थयोः सन्निकर्षनिमित्तत्वात्॥ (27.0)

तैश्चापदेशो ज्ञानविशेषाणाम् ॥ (28.0)

व्याहतत्वादहेतुः ॥ (29.0)

नार्थविशेषप्राबल्यात्॥ (30.0)

प्रत्यक्षमनुमानम् एकदेशग्रहणात्उपलब्धेः ॥ (31.0)

न प्रत्यक्षेण यावत्तावदपि उपलम्भात्॥ (32.0)

न चैकदेशोपलब्धिरवयविसद्भावात्॥ (33.0)

साध्यत्वादवयविनि सन्देहः ॥ (34.0)

www.ayurvedah.in

सर्वाग्रहणमवयव्यसिद्धेः ॥ (35.0)

धारणाकर्षणोपपत्तेश्च ॥ (36.0)

सेनावनवत्ग्रहणमिति चेन्नातीन्द्रियत्वादणूनाम् ॥ (37.0)

रोधोपघातसादृश्येभ्यो व्यभिचारादनुमानमप्रमाणम् ॥ (38.0)

न एकदेशत्रासससादृश्येभ्यः अर्थान्तरभावात्॥ (39.0)

वर्तमानाभावः पततः पतितपतितव्यकालोपपत्तेः ॥ (40.0)

तयोः अपि अभावो वर्तमानाभावे तदपेक्षत्वात्॥ (41.0)

नातीतानागतयोः इतरेतरापेक्षा सिद्धिः ॥ (42.0)

वर्तमानाभावे सर्वाग्रहणं प्रत्यक्षानुपपत्तेः ॥ (43.0)

कृतताकर्तव्यतोपपत्तेः तूभयथा ग्रहणम् ॥ (44.0)

अत्यन्तप्रायैकदेशसाधर्म्यात् उपमानासिद्धिः ॥ (45.0)

प्रसिद्धसाधर्म्यात् उपमानसिद्धेः यथोक्तदोषानुपपत्तिः ॥ (46.0)

प्रत्यक्षेणाप्रत्यक्षसिद्धेः ॥ (47.0)

नाप्रत्यक्षे गवये प्रमाणार्थमुपमानस्य पश्यामः ॥ (48.0)

तथा इति उपसंहारात् उपमानसिद्धेः नाविशेषः ॥ (49.0)

शब्दः अनुमानमर्थस्यानुपलब्धेः अनुमेयत्वात्॥ (50.0)

उपलब्धेः अद्विप्रवृत्तित्वात्॥ (51.0)



www.ayurvedah.in

सम्बन्धाच्च ॥ (52.0)

आप्तोपदेशसामर्थ्यात्शब्दादर्थसम्प्रत्ययः ॥ (53.0)

पूरणप्रदाहपाटनानुपलब्धेश्च सम्बन्धाभावः ॥ (54.0)

शब्दार्थव्यवस्थानादप्रतिषेधः ॥ (55.0)

न सामयिकत्वात्शब्दार्थसम्प्रत्ययस्य ॥ (56.0)

जातिविशेषे चानियमात्॥ (57.0)

तदप्रामाण्यमनृतव्याघातपुनरुक्तदोषेभ्यः ॥ (58.0)

न कर्मकर्तृसाधनवैगुण्यात्॥ (59.0)

अभ्युपेत्य कालभेदे दोषवचनात्॥ (60.0)

अनुवादोपपत्तेश्च ॥ (61.0)

वाक्यविभागस्य चार्थग्रहणात्॥ (62.0)

विध्यर्थवादानुवादवचनविनियोगात्॥ (63.0)

विधिर्विधायकः ॥ (64.0)

स्तुतिर्निन्दा परकृतिः पुराकल्पः इत्यर्थवादः ॥ (65.0)

विधिविहितस्यानुवचनमनुवादः ॥ (66.0)

नानुवादपुनरुक्तयोः विशेषः शब्दाभ्यासोपपत्तेः ॥ (67.0)

शीघ्रतरगमनोपदेशवदभ्यासात्नाविशेषः ॥ (68.0)

मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यम् आप्तप्रामाण्यात्॥ (69.0)

# द्वितीयोऽध्यायः

## द्वितीय आह्निकः

न चतुष्ट्वम् ऐतिह्यार्थापत्तिसम्भवाभावप्रामाण्यात्॥ (1.0)

शब्दे ऐतिह्यानर्थान्तरभावादनुमाने

अर्थापत्तिसम्भवाभावानर्थान्तरभावात्चाप्रतिषेधः ॥ (2.0)

अर्थापत्तिरप्रमाणमनैकान्तिकत्वात्॥ (3.0)

अनर्थापत्तौ अर्थापत्त्यभिमानात्॥ (4.0)

प्रतिषेधाप्रामाण्यं चानैकान्तिकत्वात्॥ (5.0)

तत्प्रामाण्ये वा नार्थापत्त्यप्रामाण्यम् ॥ (6.0)

नाभावप्रामाण्यं प्रमेयासिद्धेः ॥ (7.0)

लक्षितेष्वलक्षणलक्षितत्वादलक्षितानां तत्प्रमेयसिद्धेः ॥ (8.0)

असत्यर्थे नाभावः इति चेन्नान्यलक्षणोपपत्तेः ॥ (9.0)

तत्सिद्धेः अलक्षितेषु अहेतुः ॥ (10.0)

न लक्षणावस्थितापेक्षसिद्धेः ॥ (11.0)

प्राक् उत्पत्तेः अभावोपपत्तेश्च ॥ (12.0)

www.ayurvedah.in

आदिमत्वात् ऐन्द्रियकत्वात्कृतकवत् उपचाराच्च ॥ (13.0)

न घटाभावसामान्यनित्यत्वान्नित्येषु अपि अनित्यवत् उपचाराच्च ॥ (14.0)

तत्त्वभाक्तयोः नानात्वविभागादव्यभिचारः ॥ (15.0)

संतानानुमानविशेषणात्॥ (16.0)

कारणद्रव्यस्य प्रदेशशब्देनाभिधानात्॥ (17.0)

प्राक् उच्चारणादनुपलब्धेः आवरणाद्यनुपलब्धेश्च ॥ (18.0)

तदनुपलब्धेः अनुपलम्भात् आवरणोपपत्तिः ॥ (19.0)

अनुपलम्भादनुपलब्धिसद्भावान्नावरणानुपपत्तिरनुपलम्भात्॥ (20.0)

अनुपलम्भात्मकत्वादनुपलब्धेः अहेतुः ॥ (21.0)

अस्पर्शत्वात्॥ (22.0)

न कर्मानित्यत्वात्॥ (23.0)

नाणुनित्यत्वात्॥ (24.0)

सम्प्रदानात्॥ (25.0)

तदन्तरालानुपलब्धेः अहेतुः ॥ (26.0)

अध्यापनादप्रतिषेधः ॥ (27.0)

उभयोः पक्षयोः अन्यतरस्याध्यापनादप्रतिषेधः ॥ (28.0)

अभ्यासात्॥ (29.0)

नान्यत्वे अपि अभ्यासस्योपचारात्॥ (30.0)

अन्यदन्यस्मादनन्यत्वादनन्यतइत्यन्यताभावः ॥ (31.0)

तदभावे नास्ति अनन्यता तयोः इतरेतरापेक्षसिद्धेः ॥ (32.0)

विनाशकारणानुपलब्धेः ॥ (33.0)

अश्रवणकारणानुपलब्धेः सततश्रवणप्रसङ्गः ॥ (34.0)

उपलभ्यमाने चानुपलब्धेः असत्त्वादनपदेशः ॥ (35.0)

पाणिनिमित्तप्रश्लेषात्शब्दाभावे नानुपलब्धिः ॥ (36.0)

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ (37.0)

अस्पर्शत्वादप्रतिषेधः ॥ (38.0)

विभक्त्यन्तरोपपत्तेश्च समासे ॥ (39.0)

विकारादेशोपदेशात्संशयः ॥ (40.0)

प्रकृतिविवृद्धौ विकारविवृद्धेः ॥ (41.0)

न्यूनसमाधिकोपलब्धेः विकाराणामहेतुः ॥ (42.0)

द्विविधस्यापि हेतोः अभावादसाधनं दृष्टान्तः ॥ (43.0)

नातुल्यप्रकृतीनां विकारविकल्पात्॥ (44.0)

द्रव्यविकारवैषम्यवत्वर्णविकारविकल्पः ॥ (45.0)

न विकारधर्मानुपपत्तेः ॥ (46.0)

विकारप्राप्तानामपुनरापत्तेः ॥ (47.0)



www.ayurvedah.in

सुवर्णादीनां पुनरापत्तेः अहेतुः ॥ (48.0)

न तद्विकाराणां सुवर्णभावाव्यतिरेकात्॥ (49.0)

वर्णत्वाव्यतिरेकात्वर्णविकाराणामप्रतिषेधः ॥ (50.0)

सामान्यवतो धर्मयोगो न सामान्यस्य ॥ (51.0)

नित्यत्वे अविकारादनित्यत्वे चानवस्थानात्॥ (52.0)

नित्यानामतीन्द्रियत्वात्तद्धर्मविकल्पाच्च वर्णविकाराणामप्रतिषेधः ॥ (53.0)

अनवस्थायित्वे च वर्णोपलब्धिवत्तद्विकारोपपत्तिः ॥ (54.0)

विकारधर्मित्वे नित्यत्वाभावात्कालान्तरे विकारोपपत्तेश्चाप्रतिषेधः ॥ (55.0)

प्रकृत्यनियमात्॥ (56.0)

अनियमे नियमान्नानियमः ॥ (57.0)

नियमानियमविरोधादनियमे नियमात्चाप्रतिषेधः ॥ (58.0)

गुणान्तरापत्त्युपमर्दह्रासवृद्धिश्लेषेभ्यः तु विकारोपपत्तेः वर्णविकाराः ॥ (59.0)

ते विभक्त्यन्ताः पदम् ॥ (60.0)

व्यक्त्याकृतिजातिसंनिधोपचारात्संशयः ॥ (61.0)

या शब्दसमूहत्यागपरिग्रहसङ्ख्यावृद्ध्यपचयवर्णसमासानुबन्धानां व्यक्तोपचारात्व्यक्तिः ॥ (62.0)

न तदनवस्थानात्॥ (63.0)

सहचरणस्थानतादर्थ्यवृत्तमानधारणसामीप्ययोगसाधनाधिपत्येभ्यो ब्राह्मणमञ्चकटराजसक्तुचन्दनगङ्गाशाटकान्नपुरुषेष्वतद्भावे अपि तदुपचारः ॥ (64.0)

आकृतिः तदपेक्षत्वात्सत्त्वव्यवस्थानसिद्धेः ॥ (65.0)

व्यक्त्याकृतियुक्ते अपि अप्रसङ्गात्प्रोक्षणादिनां मृद्गवके जातिः ॥ (66.0)

नाकृतिव्यक्त्यपेक्षत्वात्जात्यभिव्यक्तेः ॥ (67.0)

व्यक्त्याकृतिजातयः तु पदार्थः ॥ (68.0)

व्यक्तिर्गुणविशेषाश्रयो मूर्तिः ॥ (69.0)

आकृतिर्जातिलिङ्गाख्या ॥ (70.0)

समानप्रसवात्मिका जातिः ॥ (71.0)

www.ayurvedah.in

# तृतीयोऽध्यायः

## प्रथम आह्निकः

दर्शनस्पर्शनाभ्याम् एकार्थग्रहणात्॥ (1.0)

न विषयव्यवस्थानात्॥ (2.0)

तद्व्यवस्थानात् एवात्मसद्भावादप्रतिषेधः ॥ (3.0)

शरीरदाहे पातकाभावात्॥ (4.0)

तदभावः सात्मकप्रदाहे अपि तन्नित्यत्वात्॥ (5.0)

न कार्याश्रयकर्तृवधात्॥ (6.0)

सव्यदृष्टस्य इतरेण प्रत्यभिज्ञानात्॥ (7.0)

न एकस्मिन्नासास्थिव्यवहिते द्वित्वाभिमानात्॥ (8.0)

एकविनाशे द्वितीयाविनाशान्न एकत्वम् ॥ (9.0)

अवयवनाशे अपि अवयव्युपलब्धेः अहेतुः ॥ (10.0)

दृष्टान्तविरोधादप्रतिषेधः ॥ (11.0)

इन्द्रियान्तरविकारात्॥ (12.0)

न स्मृतेः स्मर्तव्यविषयत्वात्॥ (13.0)

तदात्मगुणसद्भावादप्रतिषेधः ॥ (14.0)

नात्मप्रतिपत्तिहेतूनां मनसि सम्भवात्॥ (15.0)

ज्ञातुर्ज्ञानसाधनोपपत्तेः संज्ञाभेदमात्रम् ॥ (16.0)

नियमश्च निरनुमानः ॥ (17.0)

पूर्वाभ्यस्तस्मृत्यनुबन्धात्जातस्य हर्षभयशोकसम्प्रतिपत्तेः ॥ (18.0)

पद्मादिषु प्रबोधसम्मीलनविकारवत्तद्विकारः ॥ (19.0)

न उष्णशीतवर्षाकालनिमित्तत्वात्पञ्चात्मकविकाराणाम् ॥ (20.0)

प्रेत्याहाराभ्यासकृतात्स्तन्याभिलाषात्॥ (21.0)

अयसः अयस्कान्ताभिगमनवत्तदुपसर्पणम् ॥ (22.0)

नान्यत्र प्रवृत्त्यभावात्॥ (23.0)

वीतरागजन्मादर्शनात्॥ (24.0)

सगुणद्रव्योत्पत्तिवत्तदुत्पत्तिः ॥ (25.0)

न सङ्कल्पनिमित्तत्वात्रागादीनाम् ॥ (26.0)

पार्थिवं गुणान्तरोपलब्धेः ॥ (27.0)

पार्थिवाप्यतैजसं तद्गुणोपलब्धेः ॥ (28.0)

निःश्वासोच्छ्वासोपलब्धेश्चातुर्भौतिकम् ॥ (29.0)

गन्धक्लेदपाकव्यूहावकाशदानेभ्यः पाञ्चभौतिकम् ॥ (30.0)



www.ayurvedah.in

श्रुतिप्रामाण्याच्च ॥ (31.0)

कृष्णसारे सति उपलम्भात्व्यतिरिच्य च उपलम्भात्संशयः ॥ (32.0)

महदणुग्रहणात्॥ (33.0)

रश्म्यर्थसन्निकर्षविशेषात्तद्ग्रहणम् ॥ (34.0)

तदनुपलब्धेः अहेतुः ॥ (35.0)

नानुमीयमानस्य प्रत्यक्षतोऽनुपलब्धिरभावहेतुः ॥ (36.0)

द्रव्यगुणधर्मभेदाच्च उपलब्धिनियमः ॥ (37.0)

अनेकद्रव्यसमवायात्रूपविशेषाच्च रूपोपलब्धिः ॥ (38.0)

कर्मकारितश्च इन्द्रियाणां व्यूहः पुरुषार्थतन्त्रः ॥ (39.0)

मध्यन्दिनोल्काप्रकाशानुपलब्धिवत्तदनुपलब्धिः ॥ (40.0)

न रात्रौ अपि अनुपलब्धेः ॥ (41.0)

बाह्यप्रकाशानुग्रहात्विषयोपलब्धेः अनभिव्यक्तितोऽनुपलब्धिः ॥ (42.0)

अभिव्यक्तौ चाभिभवात्॥ (43.0)

नक्तंचरनयनरश्मिदर्शनाच्च ॥ (44.0)

अप्राप्यग्रहणं काचाभ्रपटलस्फटिकान्तरितोपलब्धेः ॥ (45.0)

कुड्यान्तरितानुपलब्धेः अप्रतिषेधः ॥ (46.0)

अप्रतीघातात्सन्निकर्षोपपत्तिः ॥ (47.0)

आदित्यरश्मेः स्फटिकान्तरिते अपि दाह्ये अविघातात्॥ (48.0)

न इतरेतरधर्मप्रसङ्गात्॥ (49.0)

आदर्शोदकयोः प्रसादस्वाभाव्याद्रूपोपलब्धिः ॥ (50.0)

दृष्टानुमितानां हि नियोगप्रतिषेधानुपपत्तिः ॥ (51.0)

स्थानान्यत्वे नानात्वादवयविनानास्थानत्वाच्च संशयः ॥ (52.0)

त्वगव्यतिरेकात्॥ (53.0)

न युगपदर्थानुपलब्धेः ॥ (54.0)

विप्रतिषेधाच्च न त्वक् एका ॥ (55.0)

इन्द्रियार्थपञ्चत्वात्॥ (56.0)

न तदर्थबहुत्वात्॥ (57.0)

गन्धत्वाद्यव्यतिरेकात्गन्धादीनामप्रतिषेधः ॥ (58.0)

विषयत्वाव्यतिरेकात् एकत्वम् ॥ (59.0)

न बुद्धिलक्षणाधिष्ठानगत्याकृतिजातिपञ्चत्वेभ्यः ॥ (60.0)

भूतगुणविशेषोपलब्धेः तादात्म्यम् ॥ (61.0)

गन्धरसरूपस्पर्शशब्दानां स्पर्शपर्यन्ताः पृथिव्याः ॥ (62.0)

अप्तेजोवायूनां पूर्वं पूर्वमपोह्याकाशस्योत्तरः ॥ (63.0)

न सर्वगुणानुपलब्धेः ॥ (64.0)

एकैकश्येन उत्तरगुणासद्भावात् उत्तरोत्तराणां तदनुपलब्धिः ॥ (65.0)

विष्टं हि अपरं परेण ॥ (66.0)

न पार्थिवाप्ययोः प्रत्यक्षत्वात्॥ (67.0)

पूर्वपूर्वगुणोत्कर्षात्तत्तत्प्रधानम् ॥ (68.0)

तद्व्यवस्थानं तु भूयस्त्वात्॥ (69.0)

सगुणानामिन्द्रियभावात्॥ (70.0)

तेन एव तस्याग्रहणाच्च ॥ (71.0)

न शब्दगुणोपलब्धेः ॥ (72.0)

तदुपलब्धिः इतरेतरद्रव्यगुणवैधर्म्यात्॥ (73.0)

# तृतीयोऽध्यायः

## द्वितीय आह्निकः

कर्माकाशसाधर्म्यात्संशयः ॥ (1.0)

विषयप्रत्यभिज्ञानात्॥ (2.0)

साध्यसमत्वादहेतुः ॥ (3.0)

न युगपदग्रहणात्॥ (4.0)

www.ayurvedah.in

अप्रत्यभिज्ञाने च विनाशप्रसङ्गः ॥ (5.0)

क्रमवृत्तित्वादयुगपत्ग्रहणम् ॥ (6.0)

अप्रत्यभिज्ञानं च विषयान्तरव्यासङ्गात्॥ (7.0)

न गत्यभावात्॥ (8.0)

स्फटिकान्यत्वाभिमानवत्तदन्यत्वाभिमानः ॥ (9.0)

स्फटिके अपि अपरापरोत्पत्तेः क्षणिकत्वात्व्यक्तीनामहेतुः ॥ (10.0)

नियमहेत्वभावात्यथादर्शनमभ्यनुज्ञा ॥ (11.0)

न उत्पत्तिविनाशकारणोपलब्धेः ॥ (12.0)

क्षीरविनाशे कारणानुपलब्धिवत्दध्युत्पत्तिवच्च तदुत्पत्तिः ॥ (13.0)

लिङ्गतो ग्रहणान्नानुपलब्धिः ॥ (14.0)

न पयसः परिणामगुणान्तरप्रादुर्भावात्॥ (15.0)

व्यूहान्तरात्द्रव्यान्तरोत्पत्तिदर्शनं पूर्वद्रव्यनिवृत्तेः अनुमानम् ॥ (16.0)

क्वचित्विनाशकारणानुपलब्धेः क्वचिच्च उपलब्धेः अनेकान्तः ॥ (17.0)

न इन्द्रियार्थयोः तद्विनाशे अपि ज्ञानावस्थानात्॥ (18.0)

युगपत्ज्ञानानुपलब्धेश्च न मनसः ॥ (19.0)

तत्आत्मगुणत्वे अपि तुल्यम् ॥ (20.0)

इन्द्रियैर्मनसः सन्निकर्षाभावात्तदनुत्पत्तिः ॥ (21.0)



www.ayurvedah.in

न उत्पत्तिकारणानपदेशात्॥ (22.0)

विनाशकारणानुपलब्धेश्चावस्थाने तन्नित्यत्वप्रसङ्गः ॥ (23.0)

अनित्यत्वग्रहात्बुद्धेः बुद्ध्यन्तराद्विनाशः शब्दवत्॥ (24.0)

ज्ञानसमवेतात्मप्रदेशसन्निकर्षात्मनसः स्मृत्युत्पत्तेः न युगपत्उत्पत्तिः ॥ (25.0)

नान्तःशरीरवृत्तित्वात्मनसः ॥ (26.0)

साध्यत्वादहेतुः ॥ (27.0)

स्मरतः शरीरधारणोपपत्तेः अप्रतिषेधः ॥ (28.0)

न तद् आशुगतित्वान्मनसः ॥ (29.0)

न स्मरणकालानियमात्॥ (30.0)

आत्मप्रेरणयदृच्छाज्ञताभिश्च न संयोगविशेषः ॥ (31.0)

व्यासक्तमनसः पादव्यथनेन संयोगविशेषेण समानम् ॥ (32.0)

प्रणिधानलिङ्गादिज्ञानानामयुगपद्भावादयुगपत्स्मरणम् ॥ (33.0)

ज्ञस्य इच्छाद्वेषनिमित्तत्वात्आरम्भनिवृत्त्योः ॥ (34.0)

तल्लिङ्गत्वात्इच्छाद्वेषयोः पार्थिवाद्येषु अप्रतिषेधः ॥ (35.0)

परश्वादिषु आरम्भनिवृत्तिदर्शनात्॥ (36.0)

नियमानियमौ तु तद्विशेषकौ ॥ (37.0)

यथोक्तहेतुत्वात्पारतन्त्र्यादकृताभ्यागमाच्च न मनसः ॥ (38.0)

परिशेषात्यथोक्तहेतूपपत्तेश्च ॥ (39.0)

स्मरणं तु आत्मनो ज्ञस्वाभाव्यात्॥ (40.0)

प्रणिधाननिबन्धाभ्यासलिङ्गलक्षणसादृश्यपरिग्रहाश्रयाश्रितसम्बन्धानन्तर्यवियोगैककार्यविरोधातिशयप्राप्तिव्यवधानसुखदुःखेच्छाद्वेषभयार्थित्वक्रियारागधर्माधर्मनिमित्तेभ्यः ॥ (41.0)

कर्मानवस्थायिग्रहणात्॥ (42.0)

अव्यक्तग्रहणमनवस्थायित्वात्विद्युत्सम्पाते रूपाव्यक्तग्रहणवत्॥ (43.0)

हेतूपादानात्प्रतिषेद्धव्याभ्यनुज्ञा ॥ (44.0)

न प्रदीपार्चिःसन्तत्यभिव्यक्तग्रहणवत्तद्ग्रहणम् ॥ (45.0)

द्रव्ये स्वगुणपरगुणोपलब्धेः संशयः ॥ (46.0)

यावच्छरीरभावित्वात्रूपादीनाम् ॥ (47.0)

न पाकजगुणान्तरोत्पत्तेः ॥ (48.0)

प्रतिद्वन्द्विसिद्धेः पाकजानामप्रतिषेधः ॥ (49.0)

शरीरव्यापित्वात्॥ (50.0)

न केशनखादिषु अनुपलब्धेः ॥ (51.0)

त्वक्पर्यन्तत्वात्शरीरस्य केशनखादिषु अप्रसङ्गः ॥ (52.0)

शरीरगुणवैधर्म्यात्॥ (53.0)

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

www.ayurvedah.in

न रूपादीनामितरेतरवैधर्म्यात्॥ (54.0)

ऐन्द्रियकत्वात्रूपादीनामप्रतिषेधः ॥ (55.0)

ज्ञानायौगपद्यात् एकं मनः ॥ (56.0)

न युगपदनेकक्रियोपलब्धेः ॥ (57.0)

अलातचक्रदर्शनवत्तदुपलब्धिराशुसञ्चारात्॥ (58.0)

यथोक्तहेतुत्वात्चाणु ॥ (59.0)

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ (60.0)

भूतेभ्यो मूर्त्युपादानवत्तदुपादानम् ॥ (61.0)

न साध्यसमत्वात्॥ (62.0)

न उत्पत्तिनिमित्तत्वात्मातापित्रोः ॥ (63.0)

तथाहारस्य ॥ (64.0)

प्राप्तौ चानियमात्॥ (65.0)

शरीरोत्पत्तिनिमित्तवत्संयोगोत्पत्तिनिमित्तं कर्म ॥ (66.0)

एतेनानियमः प्रत्युक्तः ॥ (67.0)

तददृष्टकारितमिति चेत्पुनः तत्प्रसङ्गः अपवर्गे ॥ (68.0)

मनःकर्मनिमित्तत्वाच्च संयोगाव्युच्छेदः ॥ (69.0)

नित्यत्वप्रसङ्गश्च प्रायणानुपपत्तेः ॥ (70.0)

अणुश्यामतानित्यत्ववत् एतत्स्यात्॥ (71.0)

नाकृताभ्यागमप्रसङ्गात्॥ (72.0)

# चतुर्थोऽध्यायः

## प्रथम आह्निकः

प्रवृत्तिर्यथोक्ता ॥ (1.0)

तथा दोषाः ॥ (2.0)

त्रैराश्यं रागद्वेषमोहार्थान्तर्भावात्॥ (3.0)

न एकप्रत्यनीकभावात्॥ (4.0)

व्यभिचारादहेतुः ॥ (5.0)

तेषां मोहः पापीयान्नामूढस्येतरोत्पत्तेः ॥ (6.0)

निमित्तनैमित्तिकभावादर्थान्तरभावो दोषेभ्यः ॥ (7.0)

न दोषलक्षणावरोधान्मोहस्य ॥ (8.0)

निमित्तनैमित्तिकोपपत्तेश्च तुल्यजातीयानामप्रतिषेधः ॥ (9.0)

आत्मनित्यत्वे प्रेत्यभावसिद्धिः ॥ (10.0)

व्यक्ताद् व्यक्तानाम् प्रत्यक्षप्रामाण्यात्॥ (11.0)



www.ayurvedam.

न घटाद् घटनिष्पत्तेः ॥ (12.0)

व्यक्ताद् घटनिष्पत्तेरप्रतिषेधः ॥ (13.0)

अभावाद् भावोत्पत्तिः नानुपमृद्य प्रादुर्भावात्॥ (14.0)

व्याघातादप्रयोगः ॥ (15.0)

न अतीतानागतयोः कारकशब्दप्रयोगात्॥ (16.0)

न विनष्टेभ्योऽनिष्पत्तेः ॥ (17.0)

क्रमनिर्देशादप्रतिषेधः ॥ (18.0)

ईश्वरः कारणम् पुरुषकर्माफल्यदर्शनात्॥ (19.0)

न पुरुषकर्माभावे फलानिष्पत्तेः ॥ (20.0)

तत्कारितत्वाद् अहेतुः ॥ (21.0)

अनिमित्ततो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात्॥ (22.0)

अनिमित्तनिमित्तत्वान्नानिमित्ततः ॥ (23.0)

निमित्तानिमित्तयोरर्थान्तरभावाद् अप्रतिषेधः ॥ (24.0)

सर्वमनित्यमुत्पत्तिविनाशधर्मकत्वात्॥ (25.0)

न अनित्यतानित्यत्वात्॥ (26.0)

तदनित्यत्वमग्नेर्दाह्यं विनाश्यानुविनाशवत्॥ (27.0)

नित्यस्याप्रत्याख्यानम् यथोपलब्धिव्यवस्थानात्॥ (28.0)

सर्वं नित्यम् पञ्चभूतनित्यत्वात्॥ (29.0)

न उत्पत्तिविनाशकारणोपलब्धेः ॥ (30.0)

तल्लक्षणावरोधादप्रतिषेधः ॥ (31.0)

न उत्पत्तितत्कारणोपलब्धेः ॥ (32.0)

न व्यवस्थानुपपत्तेः ॥ (33.0)

सर्वँ पृथग् भावलक्षणपृथक्त्वात्॥ (34.0)

न अनेकलक्षणैरेकभावनिष्पत्तेः ॥ (35.0)

लक्षणव्यवस्थानादेवाप्रतिषेधः ॥ (36.0)

सर्वमभावो भावेष्वितरेतराभावसिद्धेः ॥ (37.0)

न स्वभावसिद्धेर्भावानाम् ॥ (38.0)

न स्वभावसिद्धिः आपेक्षिकत्वात्॥ (39.0)

व्याहतत्वादयुक्तम् ॥ (40.0)

संख्यैकान्तासिद्धिः कारणानुपपत्त्युपपत्तिभ्याम् ॥ (41.0)

न कारणावयवाभावात्॥ (42.0)

निरवयवत्वादहेतुः ॥ (43.0)

सद्यः कालान्तरे च फलनिष्पत्तेः संशयः ॥ (44.0)

न सद्यः कालान्तरोपभोग्यत्वात्॥ (45.0)

कालान्तरेणानिष्पत्तिहेतुर्विनाशात्॥ (46.0)


www.ayurvedah.in

प्राङ्निष्पत्तेर्वृक्षफलवत्तत्स्यात्॥ (47.0)

नासन्न सन्न सदसत्सदसतोर्वैधर्म्यात्॥ (48.0)

उत्पादव्ययदर्शनात्॥ (49.0)

बुद्धिसिद्धं तु तदसत्॥ (50.0)

आश्रयव्यतिरेकाद् वृक्षफलोत्पत्तिवद् इत्यहेतुः ॥ (51.0)

प्रीतेरात्माश्रयत्वादप्रतिषेधः ॥ (52.0)

न पुत्रपशुस्त्रीपरिच्छेदहिरण्यान्नादिफलनिर्देशात्॥ (53.0)

तत्सम्बन्धात्फलनिष्पत्तेस्तेषु फलवदुपचारः ॥ (54.0)

विविधबाधनायोगाद् दुःखमेव जन्मोत्पत्तिः ॥ (55.0)

न सुखस्याप्यन्तरालनिष्पत्तेः ॥ (56.0)

बाधनानिवृत्तेर्वेदयतः पर्येषणदोषाद् अप्रतिषेधः ॥ (57.0)

दुःखविकल्पे सुखाभिमानाच्च ॥ (58.0)

ऋणक्लेशप्रवृत्त्यनुबन्धाद् अपवर्गाभावः ॥ (59.0)

प्रधानशब्दानुपपत्तेर्गुणशब्देनानुवादो निन्दाप्रशंसोपपत्तेः ॥ (60.0)

समारोपणादात्मन्यप्रतिषेधः ॥ (61.0)

पात्रचयान्तानुपपत्तेश्च फलाभावः ॥ (62.0)

सुषुप्तस्य स्वप्नादर्शने क्लेशाभावादपवर्गः ॥ (63.0)

न प्रवृत्तिः प्रतिसन्धानाय हीनक्लेशस्य ॥ (64.0)

न क्लेशसन्ततेः स्वाभाविकत्वात्॥ (65.0)

प्रागुत्पत्तेरभावानित्यत्ववत्स्वाभाविकेऽप्यनित्यत्वम् ॥ (66.0)

अणुश्यामतानित्यत्ववद् वा ॥ (67.0)

न सङ्कल्पनिमित्तत्वाच्च रागादीनाम् ॥ (68.0)

# चतुर्थोऽध्यायः

## द्वितीय आह्निकः

दोषनिमित्तानां तत्त्वज्ञानादहङ्कारनिवृत्तिः ॥ (1.0)

दोषनिमित्तं रूपादयो विषयः सङ्कल्पकृताः ॥ (2.0)

तन्निमित्तं त्ववयव्यभिमानः ॥ (3.0)

विद्याविद्याद्वैविध्यात्संशयः ॥ (4.0)

तदसंशयः पूर्वहेतुप्रसिद्धत्वात्॥ (5.0)

वृत्त्यनुपपत्तेरपि तर्हि न संशयः ॥ (6.0)

कृत्स्नैकदेशावृत्तित्वाद् अवयवानामवयव्यभावः ॥ (7.0)

तेषु चावृत्तेरवयव्यभावः ॥ (8.0)

पृथक् चावयवेभ्योऽवृत्तेः ॥ (9.0)

न चावयव्यवयवाः ॥ (10.0)

एकस्मिन्भेदाभावाद् भेदशब्दप्रयोगानुपपत्तेरप्रश्नः ॥ (11.0)

अवयवान्तरभावेऽप्यवृत्तेरहेतुः ॥ (12.0)

केशसमूहे तैमिरिकोपलब्धिवत्तदुपलब्धिः ॥ (13.0)

स्वविषयानतिक्रमेणेन्द्रियस्य पटुमन्दभावाद्विषयग्रहणस्य तथाभावो नाविषये प्रवृत्तिः ॥ (14.0)

अवयवावयविप्रसङ्गश्चैवम् आप्रलयात्॥ (15.0)

न प्रलयोऽणुसद्भावात्॥ (16.0)

परं वा त्रुटेः ॥ (17.0)

आकाशव्यतिभेदात्तदनुपपत्तिः ॥ (18.0)

आकाशासर्वगतत्वं वा ॥ (19.0)

अन्तर्बहिश्च कार्यद्रव्यस्य कारणान्तरवचनाद् अकार्ये तदभावः ॥ (20.0)

शब्दसंयोगविभावाच्च सर्वगतम् ॥ (21.0)

अव्यूहाविष्टम्भविभुत्वानि चाकाशधर्माः ॥ (22.0)

मूर्तिमतां च संस्थानोपपत्तेरवयवसद्भावः ॥ (23.0)

संयोगोपपत्तेश्च ॥ (24.0)

अनवस्थाकारित्वाद् अनवस्थानुपपत्तेश्चाप्रतिषेधः ॥ (25.0)

बुद्ध्या विवेचनात्तु भावानां याथात्म्यानुपलब्धिस्तन्त्वपकर्षणे

पटसद्भावानुपलब्धिवत्तदनुपलब्धिः ॥ (26.0)

व्याहतत्वादहेतुः ॥ (27.0)

तदाश्रयत्वादपृथग्ग्रहणम् ॥ (28.0)

प्रमाणतश्चार्थप्रतिपत्तेः ॥ (29.0)

प्रमाणानुपपत्त्युपपत्तिभ्याम् ॥ (30.0)

स्वप्नविषयाभिमानवदयं प्रमाणप्रमेयाभिमानः ॥ (31.0)

मायागन्धर्वनगरमृगतृष्णिकावद्वा ॥ (32.0)

हेत्वभावादसिद्धिः ॥ (33.0)

स्मृतिसंकल्पवच्च स्वप्नविषयाभिमानः ॥ (34.0)

मिथ्योपलब्धेर्विनाशस्तत्त्वज्ञानात्स्वप्नविषयाभिमानप्रणाशवत्प्रतिबोधे ॥ (35.0)

बुद्धेश्चैवं निमित्तसद्भावोपलम्भात्॥ (36.0)

तत्त्वप्रधानभेदाच्च मिथ्याबुद्धेर्द्वैविध्योपपत्तिः ॥ (37.0)

समाधिविशेषाभ्यासात्॥ (38.0)

नार्थविशेषप्राबल्यात्॥ (39.0)

क्षुदादिभिः प्रवर्तनाच्च ॥ (40.0)

www.ayurvedah.in

पूर्वकृतफलानुबन्धात्तदुत्पत्तिः ॥ (41.0)

अरण्यगुहापुलिनादिषु योगाभ्यासोपदेशः ॥ (42.0)

अपवर्गेऽप्येवं प्रसङ्गः ॥ (43.0)

न निष्पन्नावश्यम्भावित्वात्॥ (44.0)

तदभावश्चापवर्गे ॥ (45.0)

तदर्थं यमनियमाभ्यासात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः ॥ (46.0)

ज्ञानग्रहणाभ्यासस् तद्विद्यैश्च सह संवादः ॥ (47.0)

तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोऽर्थिभिरनसूयिभिरभ्युपेयात्॥ (48.0)

प्रतिपक्षहीनमपि वा प्रयोजनार्थमर्थित्वे ॥ (49.0)

तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं

कण्टकशाखावरणवत्॥ (50.0)

ताभ्यां विगृह्यकथनम् ॥ (51.0)

## पञ्चमोऽध्यायः

## प्रथम आह्निकः

साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रषङ्गप्रतिदृष्टान्तानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः ॥ (1.0)

साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ ॥ (2.0)

गोत्वाद् गोसिद्धिवत्तत्सिद्धिः ॥ (3.0)

उत्कर्षसमादिजातिषट्कप्रकरणम् ॥ (4.0)

साध्यदृष्टान्तयोर्धर्मविकल्पाद् उभयसाध्यत्वाच्चोत्कर्षापकर्षवर्ण्यविकल्पसाध्यसमाः ॥ (5.0)

किंचित्साधर्म्याद् उपसंहारसिद्धेर्वैधर्म्याद् अप्रतिषेधः ॥ (6.0)

साध्यातिदेशाच्च दृष्टान्तोपपत्तेः ॥ (7.0)

प्राप्य साध्यमप्राप्य वा हेतोः प्राप्त्याविशिष्टत्वाद् अप्राप्त्यासाधकत्वाच्च प्राप्त्यप्राप्तिसमौ ॥ (8.0)

घटादिनिष्पत्तिदर्शनात्पीडने चाभिचारादप्रतिषेधः ॥ (9.0)

दृष्टान्तस्य कारणानपदेशात्प्रत्यवस्थानाच्च प्रतिदृष्टान्तेन प्रसङ्गप्रतिदृष्टान्तसमौ ॥ (10.0)

प्रदीपोपादानप्रसङ्गनिवृत्तिवत्तद्विनिवृत्तिः ॥ (11.0)

प्रतिदृष्टान्तहेतुत्वे च नाहेतुर्दृष्टान्तः ॥ (12.0)

प्रागुत्पत्तेः कारणाभावाद् अनुत्पत्तिसमः ॥ (13.0)

तथाभावादुत्पन्नस्य कारणोपपत्तेर्न कारणप्रतिषेधः ॥ (14.0)

सामान्यदृष्टान्तयोरैन्द्रियकत्वे समाने नित्यानित्यसाधर्म्यात्संशयसमः ॥ (15.0)

साधर्म्यात्संशये न संशयो वैधर्म्यादुभयथा वा संशयेऽत्यन्तसंशयप्रसङ्गो नित्यत्वानभ्युपगमाच्च सामान्यस्याप्रतिषेधः ॥ (16.0)

उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमः ॥ (17.0)

प्रतिपक्षात्प्रकरणसिद्धेः प्रतिषेधानुपपत्तिः प्रतिपक्षोपपत्तेः ॥ (18.0)

त्रैकाल्यासिद्धेर्हेतोरहेतुसमः ॥ (19.0)

न हेतुतः साध्यसिद्धेः त्रैकाल्यास्सिद्धिः ॥ (20.0)

प्रतिषेधानुपपत्तेश्च प्रतिषेद्धव्याप्रतिषेधः ॥ (21.0)

अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ (22.0)

अनुक्तस्यार्थापत्तेः पक्षहानेः उपपत्तिरनुक्तत्वाद् अनैकान्तिकत्वाच्चार्थापत्तेः ॥ (23.0)

एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसङ्गात्सद्भावोपपत्तेः ॥ (24.0)

अविशेषसमः ॥ (25.0)

क्वचिद्धर्मानुपपत्तेः क्वचिच्चोपपत्तेः प्रतिषेधाभावः ॥ (26.0)

उभयोकारणोपपत्तेरुपपत्तिसमः ॥ (27.0)

उपपत्तिकारणाभ्यनिज्ञानाद् अप्रतिषेधः ॥ (28.0)

निर्दिष्टकारणाभावेऽप्युपलम्भादुपलब्धिसमः ॥ (29.0)

कारणान्तरादपि तद्धर्मोपपत्तेरप्रतिषेधः ॥ (30.0)

तदनुपलब्धेरनुपलम्भाद् अभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः ॥ (31.0)

अनुपलम्भात्मकत्वाद् अनुपलब्धेरहेतुः ॥ (32.0)

ज्ञानविकल्पानां च भावाभावसंवेदनाद् अध्यात्मम् ॥ (33.0)

साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसङ्गादनित्यसमः ॥ (34.0)

साधर्म्यादसिद्धेः प्रतिषेधासिद्धिः प्रतिषेध्यसाधर्म्याच्च ॥ (35.0)

दृष्टान्ते च साध्यसाधनभावेन प्रज्ञातस्य धर्मस्य तस्य चोभयथा भावान्नाविशेषः ॥ (36.0)

नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः ॥ (37.0)

प्रतिषेध्ये नित्यमनित्यभावादनित्येऽनित्यत्वोपपत्तेः प्रतिषेधाभावः ॥ (38.0)

प्रयत्नकार्यानेकत्वात्कार्यसमः ॥ (39.0)

कार्यान्यत्वे प्रयत्नाहेतुत्वमनुपलब्धिकारणोपपत्तेः ॥ (40.0)



www.ayurvedah.in

प्रतिषेधेऽपि समानदोषः ॥ (41.0)

सर्वत्रैवम् ॥ (42.0)

प्रतिषेधविप्रतिषेधे प्रतिषेधदोषवद् दोषः ॥ (43.0)

प्रतिषेधं सदोषमभ्युपेत्य प्रतिषेधविप्रतिषेधे समानो दोषप्रसङ्गो मतानुज्ञा ॥ (44.0)

स्वपक्षलक्षणापेक्षोपपत्त्युपसंहारे हेतुनिर्देशे परपक्षदोषाभ्युपगमात्समानो दोष इति ॥ (45.0)

## पञ्चमोऽध्यायः

## द्वितीय आह्निकः

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥ (1.0)

प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः ॥ (2.0)

प्रतिज्ञातार्थप्रतिषेधधर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरम् ॥ (3.0)

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥ (4.0)

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥ (5.0)

अविशेषोक्ते हेतौ प्रतिषिद्धे विशेषमिच्छतो हेत्वन्तरम् ॥ (6.0)

प्रकृतादर्थाद् अप्रतिसम्बद्धार्थमर्थान्तरम् ॥ (7.0)

वर्णक्रमनिर्देशवन्निरर्थकम् ॥ (8.0)

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥ (9.0)

पौर्वापर्यायोगाद् अप्रतिसम्बद्धार्थमपार्थकम् ॥ (10.0)

अवयवविपर्यासवचनमप्राप्तकालम् ॥ (11.0)

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥ (12.0)

हेतूदाहरणाधिकमधिकम् ॥ (13.0)

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्॥ (14.0)

अनुवादे तु अपुनरुक्तं शब्दाभ्यासादर्थविशेषोपपत्तेः ॥ (15.0)

अर्थात्आपन्नस्य स्वशब्देन पुनर्वचनम् ॥ (16.0)

विज्ञातस्य परिषदा त्रिरभिहितस्यापि अप्रत्युच्चारणमननुभाषणम् ॥ (17.0)

अविज्ञातं चाज्ञानम् ॥ (18.0)

उत्तरस्याप्रतिपत्तिरप्रतिभा ॥ (19.0)

कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः ॥ (20.0)

स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥ (21.0)

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥ (22.0)

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥ (23.0)

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गः अपसिद्धान्तः ॥ (24.0)

हेत्वाभासाश्च यथोक्ताः ॥ (25.0)

www.ayurvedah.in

**e-publication of www.ayurveda.in .**
**Online FREE in pdf format**

1. **Āyurveda books**
    a. Astanga Hridayam
    b. Astanga Samgraha
    c. Charaka Samhita
    d. Madhava nidanam
    e. Sarangadhara Samhita
    f. Sushruta Samhita
2. **Contemporary books**
    a. Sad darsanam
    b. Agastiya Ratnapariksa
    c. Amarakosa
    d. Ashtadhyayi
    e. Garbhopanisat
    f. Gheranda Samhita
    g. Goraksa Shataka
    h. Hatyoga pradipika
    i. Kamasutra
3. **Other books**
    a. **Puranas**
    b. **upanishadas**

www.ayurvedah.in

PUBLISHED by **aarsha, jaipur : aarshaayurveda@gmail.com**

**Other publications (Hard copy) Published or Marketed by aarsha, Jaipur and available on [www.ayurveda.in](http://www.ayurveda.in)**

1. Tatvabodha Commentary (of Sivadas Sen) on Astanga hridaya **Rs 300/-**
2. Bhanumati Commentary (of Chakrapani dutta)on Sushruta Samhita **Rs 150/-**
3. Charakatatvapradipika Commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
4. Charakopaskara commentary (of Sivadas Sen) on Charaka Samhita **Rs 300/-**
5. Chanda in Ayurveda Samhita :student edition **Rs** 175 ( original price Rs 300)
6. madhavaniadna Avavodha 2 :student edition **Rs** 300 ( original price Rs 495)
7. madhavanidana Anusthana I :student edition **Rs** 600 ( original price Rs 1095)
8. madhavanidana Anusthana II :student edition **Rs** 700 ( original price Rs 1195)
9. Madhavanidana patha :student edition **Rs** 500 ( original price Rs 895)

**aarsha**
**Plot no. 4, Khandelwal nagar Extn,**
**Near Premnagar pulia, Agra Road,**
**Jaipur- 302031, Rajasthan**

www.ayurvedah.in